तिथिनिर्णय॰
१

ॐस्वस्तिश्रीगणेशायनमः
चैत्रेमासिजगद्ब्रह्मासमर्जप्र
थमे अहनिशीघ्रपूर्वेद्य वत्स
रतुवासिश्रोक्तः २ चैत्रस्य
द्वैवसेनाद्दौवत्सिराद्ये तथैव
नेभः तत्रपरयुताः अमावा
वीपुराणात् ग्रहनप्रयादाः
नेप्रयादानेसमारभेदिनपत्र
दिता अस्याःप्रदानात्पितर
शुक्लेन विशेषाद्दुर्गमीम्
गहेदेयंश्रीतामलकंजलःसु
ममसकलमनोरथाः स्थानेः
अमृतक तृतीयायांगौरीमी
यतोहेवीभांकरेणासमन्वि

[illegible]

वाजसनेयी संहिता

तिथि निर्णय

पृ० - 54

तचोदयिकीतिथीर्ग्राह्या
त्योक्तेः हिनद्वयेपितद्या
द्यावृद्धेरिमितोविंदाशौवे
केलाभोगोनित्यः वत्सर
क्तेः अस्यामेवनवरात्रा
तृतीयायांगुणान्वितेतिदे
स्वरः पुत्रैहिविप्रकपि
ग्रामान्याभूतेभ्यः प्रतिपा
मिति तथा प्रयांदानम
हतानननः ब्राह्मणास्य
अस्यप्रदानात्सकलाः
तीहनशंसयइति चै
नेदेवीपुराणे तृतीयायां
कर्पूरमागणवकास्मुगंधकैः सुगंधधूपदीपैश्चचंदनेनविशेषतः

राम॰
१

आंदोलनेचैत्रतृतीयायांशिवोमातुष्टयेस्यदिति इयंपराग्राह्या मुहूर्तमात्रसत्वेपिदिने गौरीव्रतेपरेतिमाधवोक्तेः ॥
अत्रैवसौभाग्यशयनव्रतमुक्तं मात्स्ये वसंतमासमासाद्यतृतीयायांजनप्रिये सौभाग्यायसदास्त्रीभिःकार्यापुत्रसु
खेप्सुभिरिति इयंमन्वादिः अक्षयपत्तुस्थिततत्वाच्चौर्वान्हिकीग्राह्या एवंकृतेतुसदाग्रहणेशुक्लामनुयुगादयः
च १ दैवेकर्मणिपित्र्येचकृष्णेचैवापरान्हिकेति गालवचनादितिहेमाद्रिः कालादर्शेतु पित्र्येःपरान्हिकावमु
क्तं अत्रश्राद्धमुक्तं मात्स्ये कर्तव्यंश्राद्धंविधानेनमन्वादिषुयुगादिषु हायनानिद्विसाहस्रंपितॄणांतृप्तिदंभवेत् ॥
अधिमासेपीदंकार्यंमन्वादिकंतैर्थिकंचकुर्यान्मासमासद्वयेपिचेत्स्मरति चंद्रिकोक्तेः अत्रपिण्डदानंनास्ति विषुवा
यनसंक्रांतिमन्वादिषुयुगादिषु विहायपिंडनिर्वापसर्वंश्राद्धंसमाचरेदिति कालादर्शोक्तेः प्रकरणेप्यपिक्षिप्तमुक्त
स्व विधानेतंभुवःशांतिमंत्रेचशतवारंजलेजपेत् मन्वादयोयदाशून्याःकृतेनैव वायादीति सर्वथाप्यसमर्थश्चे
द्धान्यपि नित्यानितेषामयंसंग्रहः अमाव १२ मनु १४ युगक्रांत्या १६ धृति १३ पात १३ महालया १६ ॥
अन्वष्टकाश्चपूर्वेद्युः १२ षण्णवत्युक्तश्राद्धकेति अत्रैव तृतीयायामन्याजयन्ती चैत्रशुक्लपंचमीत्यपरे ॥
आषाढशुक्लैकादशीत्यन्ये इयंचतदुपासकानांनित्या अन्येषांतुकाम्या चैत्रशुक्लपंचमीकल्पादिः अत्र
स्नानदानादिमहाफलम् चैत्रशुक्लाष्टम्यांभवान्याउत्पत्तिः तत्रयुग्मवाक्यात्पूर्वाग्राह्या अत्रभवानीयात्रोक्ता ॥
रा

तिथिनिर्णय
२

काशीखंडे भवानीयस्तु पश्येत शुक्लाष्टम्यां मधौ नरः न जातु शोकं लभते सदानंदमयो भवेदिति।
अत्रैवाशोककलिकाप्राशनमुक्तम् हेमाद्रौ लैंगे अशोककलिकाश्चाष्टौ ये पिबंति पुनर्वसौ चैत्र
मासि सिताष्टम्यां न ते शोकमवाप्नुयुः प्राशनमंत्रः त्वामशोकवराभीष्ट मधुमाससमुद्भव पिबा
मि शोकसंतप्तो मामशोकं सदा कुर्विति मत्स्यचंद्रोदयेपि विष्णुः पुनर्वसुबुधोपेता चैत्रमासे सि
ताष्टमी प्रातस्तु विधिवत्स्नात्वा वाजपेयफलं लभेदिति चैत्रशुक्लनवमी रामनवमी सा च मध्या
ह्नव्यापिनी ग्राह्या अगस्त्यसंहितायां चैत्रशुद्धे तु नवमी पुनर्वसुयुता यदि सैव मध्याह्नयोगेन
महापुण्यतमा भवेदिति तथा चैत्रमासे नवम्यां तु जातो रामः स्वयं हरिः पुनर्वस्वृक्षसंयुक्ता सा तिथिः स
र्वकामदा केवलापि सदोपोष्या नवमी शब्दसंग्रहादिति दिनद्वये मध्याह्नव्याप्तौ तदभावे वा पुन
र्वसुयुतामपि पूर्वां त्यक्त्वा परैव ग्राह्या तदुक्तं तत्रैव नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैरि
ति वस्तो यदा प्रातस्त्रिमुहूर्ता नवमी दशमी च तस्मिन्नेव दिने समाप्यते तदा स्मार्तानामुत्तरदिव रामनवमी
सएकादशीनिमित्तोपवासेन नवमीव्रतांगपारणालोपो मा भूदिति तत्र स्मार्तैरष्टमीविद्धैव ग्राह्या २

वेधवेत्तु वर्जेत्तिस्त्वनमितिबोध्यम् इदं च व्रतं नित्यकाम्यं उपोषणे जागरणे पितृननुदिश्य तर्पणं तस्मिन्न्
दिने नु कर्तव्यं व्रतस्य शास्ति मनीषिभिः यस्तु रामनवम्यां तु भुंक्ते मोहाद्विमूढधीः कुम्भीपाकेषु घोरेषु पच्यते नात्र सं
शयः इत्यगस्त्यसंहितोक्तेः अत्र मध्याह्ने पूजा रात्रौ जागरणं तथा परेद्युः प्रातः पायसहोमे श्रीरामप्रतिमादिके
होमादेर्बोध्यं इयं च मलमासे न कार्या कृतमप्युक्तसंस्थान्नोपवासः फलतो भवेत् न कुर्यान्मलमासे तु महा
दानं व्रतानि चेति माधवीयसंग्रहवचनात् अर्घ्यमंत्रस्तु दशाननवधार्थाय धर्मसंस्थापनाय च राक्ष
सानां विनाशाय दैत्यानां निधनाय च परित्राणाय साधूनां जातो रामः स्वयं हरिः गृहाणार्घ्यं मया दत्तं भ्रातृभिः स
सहितोऽनघेति प्रतिमादानमंत्रस्तु इमां स्वर्णमयीं रामप्रतिमां समलंकृतां चित्रवस्त्रयुगच्छन्नां रामोऽहं ॥
राघवाय ते श्रीरामप्रीतये दास्ये तुष्टो भवतु राघव। इति दत्त्वा विधानेन दद्याद्दक्षिणां भुवे ब्रह्महत्यादि
पापेभ्यो मुच्यते नात्र संशयः इति चैत्रशुक्लैकादश्यां दोलोत्सव उक्तो मासे चैत्रमासस्य शुक्लायामेका
दश्यां तु वैष्णवैः आंदोलनीयो देवेशः सलक्ष्मीको महोत्सवैरिति चैत्रस्य शुक्लद्वादश्यां जायते दमनोत्स
वः द्वादश्यां चैत्रमासस्य शुक्लायां दमनोत्सवः बौधायनादिभिः प्रोक्तः कर्तव्यः प्रतिवत्सरमिति रामार्च प
नचंद्रिकोक्तेः ऊर्जे व्रतं मधौ दोला श्रावणे तंतुपूजनं चैत्रे च दमनारोपमकुर्वाणो व्रजत्यधः इति तत्रैव
प्रतिपाद्यवचनाच्च इदं शुक्रास्तादावपि कार्यं उपाकर्मोत्सर्जनं च पवित्रं दमनार्पणं ईशानस्य बलिं

३

ति॰ नि॰
३

विष्णोः शयनं परिवर्तनं कुर्याद्भुक्तग्रहोरस्ते ग्राह्ये यीतिविनिश्चयः इति भविष्यार्णवे दृशज्ञार्णवचनात्
चैत्रशुक्लत्रयोदश्यामनंगव्रतमुक्तं तत्र मासपूर्वापरा ह्यात्रयोदशी तिथिः स्मृता इति दीपिकोक्तेः चैत्रशुक्लचतु
र्दशी पूर्वा ग्राह्या निशिभ्रमणं तिथ्वन्ता निशाः ऋक्षयः फलं भवेदुत: कृतं तत्र चतुर्दश्यां सत्यां तं गजनं भवेत् इति
वं अग्न्यवैतान् मधोः श्रावणमासस्य शुक्ला या च चतुर्दशी सा रात्रिव्यापिनी ग्राह्या नान्या शुक्लाकदाचनेति
ला हेमाद्रौ बोधायनोक्तेश्च चैत्री पौर्णमासी चैत्रान्यनिर्णयान्यत्र एव अत्रांशो निर्णयोमत्ते विष्णुपर्येष्वपि 'व
चैत्री चित्रायुता चेत्स्यात्तस्यां चित्रवस्त्रदानेन सौभाग्यमाप्नोति तथा ब्राह्मे मन्वादौ कर्णेरीवापि वारे यौते
पु चैत्रिका तत्राश्वमेधजं पुण्यं स्नानस्नानादिभिर्भवेत् वायवीये संवत्सरक्रमाच्चाचाथाः माफल्पायावि
लाभुरान् दमनेनार्चयेच्चैत्र्यां विशेषवासदापिधं उत्पन्नमद्यादिरपि चैत्रकृष्णत्रयोदश्यां महावारुणी
संज्ञके कैयोगः तदुक्तं वाचस्पतिनिबंधे शनिवारसमायुक्ता सामहावारुणीस्मृता गंगायां यदि लभ्येत को
टिसूर्यग्रहादिका शुभयोगसमायुक्ता शनौ शतभिषा यदि महामहेति विख्याता त्रिकोटिकुलमुद्धरेत्
चैत्रासिते वारुणऋक्षयुक्ता त्रयोदशी सूर्यसुतस्य वारे योगे शुभे सा महती महत्याः गंगाजलेऽर्कग्रहको
टितुल्येति । त्रिस्थलीसेतौ तु ब्रह्मांडपुराणेपि वारुणेन समायुक्ता मधौ कृष्णत्रयोदशी गंगायां लभ्य
ते कोटिसूर्यग्रहणासमो भवेदिति कल्पतरौ ब्राह्मे मधौ कृष्णत्रयोदश्यां शनौ शतभिषा युते वारु राम
३

गीतिमाहात्म्यानामुभेनु मह तिस्रस्तेति चैत्रस्य कृष्णचतुर्दश्यां तु विशेषतः स्मर्यते पृथ्वीचंद्रोदये पुलस्त्यः चैत्रकृ-
ष्णचतुर्दश्यां यः स्नायाच्छिवसन्निधौ न प्रेततामवाप्नोति गंगायां तु विशेषतः इति अत्र पृथ्वीगयायां स्कंदपुराणे स्थलाम।
चैत्रस्य कृष्णपक्षे तु चतुर्दश्यां द्विजोत्तमाः स्नानात् रुद्रकरे तीर्थे परमं पदमवाप्नुयादिति भारते इति चैत्र पृथ्वीचंद्रो-
दये पाद्मे तीर्थे वानुदिने स्नाने तिलैस्तु पितृतर्पणं दानं धर्मं घटादीनां मधुसूदनपूजनं माधवमासि कुर्वीत मधु-
सूदनतुष्टिदं अथ वैशाखस्नानम् तत्र पृथ्वीचंद्रोदय विष्णुस्मृति पाद्मयोः तुलामकरमेषेषु प्रातःस्नानं विधी-
यते हविष्यं ब्रह्मचर्यं च महापातकनाशनं मितिसारमास ऊर्जः अन्यदपि पद्मपुराणे तत्रैव पाद्मे। ५४
मधुमासस्य शुक्लायामेकादश्यामुपोषितः पंचदश्यां च भावीर मेषसंक्रमणेपि वा वैशाखस्नाननियमं ब्राह्मणाना-
मनुज्ञया मधुसूदनमभ्यर्च्य कुर्यात्संकल्पपूर्वकं तत्र मंत्रः वैशाखं सकलं मासे मेषसंक्रमणे रवेः प्रातःस्नानि-
यमः स्नास्ये प्रीयतां मधुसूदनः मधुहंतुः प्रसादेन ब्राह्मणानामनुग्रहात् निर्विघ्नमस्तु मे पुण्यं वैशाखे
स्नानमन्वहं माधवे मेषगे भानौ मुरारे मधुसूदनः प्रातःस्नानेन मे नाथ फलदो भव पापहन् डाँ
तीर्थनामापरिज्ञाने तु तत्रैव स्मर्यते यदा न ज्ञायते नाम तस्य तीर्थस्य भो द्विजाः तत्रत्वुच्चारणीयं
ये विष्णुतीर्थमिदं त्विति तत्र पाद्मे त्रयोदश्यां चतुर्दश्यां वैशाखे शुक्लपक्षे दिनत्रयं अपि स्नानं विधानेन।

ति॰नि॰ गीवापुरुषोपिवा प्रातःस्नानःसनियतःसर्वपापैःप्रमुच्यतइति यदातुवैशाखेमलमासोभवति तदाकाम्यानां
५ समाप्तिनिषेधान्मासद्वयेस्नानंनियमाश्चकर्तव्याः मासोपवासचांद्रायणादितुमलमासएवसमापयेत् तदुक्तं
दीपिकायां नियतुत्रिंशद्दिनत्वाच्छुभेमास्यारंभसमापयेत् मलिनेमासोपवासमिति वैशाख्यांविधिवत्स्ना
त्वाभोजयेत्ब्राह्मणान्दश तथारेसर्वपापेभ्योमुच्यतेनात्रसंशयः वैशाखशुक्लतृतीया अक्षयतृतीया सा
चपूर्वाह्णव्यापिनीग्राह्या दिनद्वयेतद्व्याप्तौतुपरैवेति निर्णयामृतादयस्थितम् इयंयुगादिरपि भारते ॥
यामन्वाद्यायुगाद्याश्चतिथयःस्नानमानवः स्नात्वाहुत्वाजप्त्वाचदत्त्वानंतफलंलभेदिति श्राद्धेपिपूर्वा
ह्णव्यापिनीग्राह्या पूर्वाह्णेतुसदाकार्याःशुक्लामनुयुगादयः दैवेकर्मणिपित्र्येचकृष्णेचैवापराह्णिके॥ रा
इतिनारदोक्तेः यद्दिवोदासोपि योगाभिजलः वैशाखस्यतृतीयांयःपूर्वविद्धांकरोतिवै हव्यंदेवानगृह्णंति
कव्यंचपितरस्तथेति स्मृत्यर्थसारगोविंदार्णवादिष्वप्येवं तेनेयंपूर्वाह्णव्यापिन्येव दिनद्वयेतद्या
प्तौपिपरा इमामुपक्रम्य गौरीविनायकोपेताब्राह्मणकोटिप्रदासदेति नारदोक्तेः उपवासेतुपूर्वास
वेकृतिर्व्यतीपातोयुगमन्वादयस्तथा सन्मुखाउपवासेस्युर्दानादावेतिमाःस्मृताः इत्यनेनभद्रोदा
हृतवचनात् यत्तुनिर्णयामृतकृत्तोक्तं आमाश्राद्धमापराह्णिकमुक्तमेषमन्वंतरादीनांविनिर्णयः ॥ ५

इति कालादर्शोक्तेर्मन्वादयस्तु शुक्लपक्षे पराह्णव्यापिन्यो ग्राह्याः इत्युक्तेः स्मृतिचन्द्रिकायां विष्णुधर्मादिविषयक
मिति तन्मन्वादिग्रन्थमिलाक्षरवचनविरुद्धं कालादर्शोक्तिरकल्पतरुयुगादिविषयेति अत्र विशे
षो हेमाद्रौ भविष्ये वैशाखस्य च या शुक्ला तृतीया नवमी च या गङ्गातोयेन नरः स्नात्वा मुच्यते सर्वकिल्बिषैः
तस्यां कार्यो यवैर्होमो यवैर्विष्णुं समर्चयेत् यवान्दद्याद्द्विजातिभ्यः प्रयतः प्राशयेद्यवानिति अत्र
दानविशेषेऽत्रैव भविष्ये उमोत्तरीयकम् उदकुम्भान्सकनकान्सान्नान्सर्वरसैः सह यवगोधूमचणा
ए॰ कान्सक्तुदध्योदनं तथा ऐक्षवं क्षीरविकारं संभवानिः प्रदातव्यमिति देवीपुराणे तृतीयां तु वैशा
खे रोहिण्यक्षयुतां उदकुम्भदानात्पुण्यं पितृभ्यो विद्यमहाः गन्धोदकतिलैर्मिश्रं सान्नं कुम्भ
फलान्वितं पितृभ्यः संप्रदास्यामि अक्षय्यमुपतिष्ठतु इति इह च प्राक्तदिने सहिता मिश्रा चन्द्रा
ग॰ दिभोजनं शयादिप्रसंगे विधाने रात्रौ भुक्ते नरो वृत्ते मन्वादिषु युगादिषु श्राद्धकृद्भिस्तथा ग्रावणे
दृष्टां नयानकमिति अपराह्णे यमः कृतोपवासाः सालिसंयेयुगादिदिनेषु तु हासं तानि
सहितं तेषां लोकाः महोदयाः इति वैशाखेऽमावास्यासतितं तत्रैव युगादिः कार्या दर्शादर
मुनीन्द्रकक्षेश्चनुर्द्दे युगादिषु इति हेमाद्रौ सर्व्वसंगव तमान महोदकुम्भमन्वादिमहालय
युगादिरिति कालादर्शोक्तनामलसंक्रान्तेष्वेषु पक्षिगतानाद्य महोदये नेहमप्यात्रयो दर्शाः

लं५

विवक्षितेति माधवः स्मृतिचंद्रिकायां तु मासद्वयेपि कर्तव्यमित्युक्तं यौगादिकं मासिकं च श्रा
द्धं चापरपक्षिकं मन्वादिकं तीर्थिकं च कुर्यान्मासद्वयेपि चेति अपरपक्षः कृष्णपक्षः ननु श्रा
द्धालभः नस्यानवतिषेधात् मदनरत्ने मरीचिः प्रतिमासं मृताहे च आद्यं यत्प्रतिवत्सरं
मन्वादौ च युगादौ च तन्मासो कर्मयोरपीति प्रतिवत्सरं क्षिप्रमासो कल्पादिस्त्वाहमिति
नैव व्याख्यातं अत्र समुद्रस्नाने महाफलं तदुक्तं पृथ्वीचंद्रोदये सौरपुराणे युगादौ तु नरः स्ना
त्वा विधिवल्लवणोदधौ गोसहस्रप्रदानस्य कुरुक्षेत्रे फलं हियत् तत्फलं लभते मर्त्यो भूमि
दानस्य च फलमिति ग्रंथे निर्णयः सर्वयुगादिषु प्रोक्तद्रव्यैः इयमेव तृतीया परशुरामजयंती सा च
प्रदोषव्यापिनी ग्राह्या तदुक्तं भार्गवार्चनदीपिकायां स्कंदभविष्ययोः वैशाखस्य सिते पक्षे तृती
यायां पुनर्वसौ निशायाः प्रथमे यामे रामाख्यः समये हरिः रेणुकायास्तु योगर्भादवतीर्णो
स्वयमिति दिनद्वयेन व्याप्तावेकत्र तत्समव्याप्तौ च परा अन्यथा पूर्वैव वैशाखशुक्लसप्तम्यां तदुक्तं तत्रैव भवि
गंगोत्पत्तिः तदुक्तं पृथ्वीचंद्रोदये ब्राह्मे वैशाखशुक्लसप्तम्यां जह्नुना जाह्नवी पुरा क्रोधात् व्य शुक्लातृती
पीता पुनस्त्यक्ता कर्णरंध्रात्तु दक्षिणात् दिनद्वये तद्व्याप्तावेकदेशव्याप्तौ वा पूर्वा पुनर्वसु यावैशाखेश्राद्ध
कार्या वैशाखशुक्लद्वादश्यां योगविशेषो हेमाद्रौ पंचाननस्थो गुरुरुच्चमित्रो भौमेयेरपि पोष्यादिनद्वये
निशायाम
यां पूर्वयामे चेदुत्तरान्यत्र पूर्वकेति ऋ॰ ८ ५

स्नाद्यदितिशुक्लपक्षे पाशाविधानाकरमेरायुक्तानि तिथिर्व्यतीपातरवीहयोगः अस्मिंस्तु गोभूमिहिरण्यवस्त्रदानेन सर्वे पापि...
शापं सुरत्वमिंद्रत्वमनामयत्वं मर्त्याधिपत्यं लभते मनुष्य इति पंचाननः सिंहः पाशाभिधाना तिथिर्हि दृष्टा करमेद्वयं...
वैशाखस्य शुक्लचतुर्दशी नृसिंहचतुर्दशी सा प्रदोषव्यापिनी ग्राह्या तदुक्तं हेमाद्रौ नृसिंहपुराणे वैशाखशुक्लपक्षे तु च
तुर्दश्यां निशामुखे तज्जन्मसंभवं पुण्यं च तत्पापप्रणाशनं वर्षे वर्षे तु कर्तव्यं मम संतुष्टिकारणमिति दिनद्वयेपि त
द्व्याप्तौ च परा विषमव्याप्तौ त्वधिकव्याप्तिमति दिनद्वये व्याप्तौ पूर्वेद्युः पूर्वदिने गौणकालव्याप्तेः तस्मात् परेद्युरेव तत्
द्व्याप्त्यभावात् अस्यां च संकल्परूपव्रतोपक्रमो मध्याह्न एव कर्तव्यः ततो मध्याह्नवेलायां नद्यादौ विमले जले स्नानपू
ल१ र्वकम् परिधाय ततो वासो व्रतकर्म समारभेत् इति तत्रैवोक्तेः अस्याश्च योगविशेषेण प्राशस्त्यं तत्रैव स्मर्यते स्वातीनक्ष
त्रयोगे च शनिवारे महद्व्रतं सिद्धियोगस्य संयोगे वणिजे करणे तथा पुंसां सौभाग्ययोगेन लभ्यते दैवयोगतः तथा
एभिर्योगैर्विनाप्यस्मिन्नह्नि पापं नाशनं तथा सर्वेषामेव वर्णानामधिकारोऽस्ति मद्व्रते तथा चिंतायमह्निनं यस्तु लंघ
येत्पापकृन्नरः स याति नरकं घोरं यावच्चंद्रदिवाकरौ अतएवेदं नित्यकाम्यमित्याहुः वैशाखशुक्लपौर्णमास्यां विशेषः स्क
न्दे भविष्ये वैशाखी कार्तिकी माघी तिथयोऽतीव पूजिताः स्नानदानविहीनास्ता न नेयाः पांडुनंदनेति इति वैशाखः
ज्येष्ठशुक्लतृतीयायां रंभाव्रतं तदुक्तं माधवीये भविष्ये भद्रे कुरुष्व यत्नेन रंभाव्रतमनुत्तमम् ज्येष्ठशुक्लतृतीया
यां स्नाना नियमतत्परेति सा पूर्वविद्धा ग्राह्या हरजपानस्वारंभासावित्रीव्रतेनकी कृष्णायां मी च भूताच कर्तव्यास्त
मुख्यातिथिदिनिस्कंदोक्तेः ज्येष्ठशुक्लादशमी दशहरा तदुक्तं हेमाद्रौ ब्राह्मे ज्येष्ठमासि सिते पक्षे दशमी हस्तसंयुता

श्री

नि॰ सि॰

६

हरते दश पापानि तस्माद्दशहरा स्मृतेति वाराहे दशमी शुक्लपक्षे तु ज्येष्ठमासे कुजेऽहनि अवतीर्णा यतः स्वर्गाद्
हस्तर्क्षे च सरिद्वरा हरते दश पापानि तस्माद्दशहरा स्मृतेति स्कांदे तु दश योगा उक्ताः यथा ज्येष्ठमासि सिते पक्षे द-
शम्यां बुधहस्तयोः गरानंदे व्यतीपाते कन्याचंद्रे वृषे रवौ दशयोगे नरः स्नात्वा सर्वपापैः प्रमुच्यते इति इह बुधभौ-
मयोर्विकल्पः इयं च यत्र योगबाहुल्यं सा ग्राह्या योगाधिक्ये फलाधिक्यात् ज्येष्ठे मलमासे सत्यपि नेयं दशहरा
कार्या किंतु शुद्धे दशहरा तेनोत्कर्ष इत्युक्तं स्कांदे यां कांचित्सरितं प्राप्य दद्याद्दर्भतिलोदकं मुच्यते दशभिः
पापैः स महापातकैरपीति अत्र विशेषः काशीखंडे स्मर्यते ज्येष्ठमासि सिते पक्षे प्राप्य प्रतिपदं तिथौ दशा-
श्वमेधिके स्नात्वा मुच्यते सर्वपातकैः एवं सर्वासु तिथिषु क्रमस्नायी नरोत्तमः आशुक्लपक्षदशमी प्रतिजन्मा-
घमुत्सृजेत् तथा लिंगे दशाश्वमेधे दशहरा दशहरा यनियो दशजन्मार्जितैः पापैः मुच्यते नात्र संशयः ज्येष्ठशु-
क्लैकादशी निर्जला तत्र निर्जलमुपोष्य विप्रेभ्यो जलकुंभान्दद्यात् इति निर्णयामृते उक्तं ज्येष्ठे पौर्णमास्यां
सावित्रीव्रतं तदुक्तं स्कांदे भविष्ये च ज्येष्ठमासि सिते पक्षे द्वादश्यां रजनीमुखे इत्युपक्रम्य व्रतं त्रि-
रात्रमुद्दिश्य दिवा रात्रौ स्थिरा भवेत् इत्युक्त्वांते उपसंहृतं ज्येष्ठमासि सिते पक्षे पूर्णिमायां तथा व्रतं चीर्णं पुरा म-
हाभक्त्या कथितं तेपि मयानघेति दाक्षिणात्याश्चैतदेवाचरंति पाश्चात्यास्तु अमावास्यायामाचरंति त-
त्रोक्तं निर्णयामृते भविष्ये अमायां च तथा ज्येष्ठे वटमूले महासती त्रिरात्रोपोषिता नारी विधिनानेन पूज-
येत् अशक्तौ तु त्रयोदश्यां नक्तं कुर्याज्जितेंद्रियः अयाचितं चतुर्दश्याममायां समुपोषणमिति हेमाद्र्या-
दिभिस्तु भाद्रपदपूर्णिमायामिदमुक्तं तत्तु नेदानीमाचरंति अत्र पूर्णिमामावास्ये पूर्वविद्धे ग्राह्ये भूत- राम॰

६

विद्धानकर्त्तव्यामसावास्याच पूर्णिमा वर्जयित्वामुनिश्रेष्ठ सावित्रीव्रतमुत्तमम् इतिब्रह्मवैवर्त्तात् यदात्वष्टादशघटि
काचतुर्दशीतदापरैव सर्वविद्धैवसावित्रीव्रतेपंचदशीतिथिः नाड्योऽष्टादशभूतस्यासुश्चेत्तत्रपरे हनि इतिमाधवो
क्तेः अत्रपूर्णिमानिरोधेनैवयथाप्रतिपत्तिसंपत्तिर्भवति तथात्रयोदश्यादिग्राह्यं तस्याप्राधान्यात् एवममाय
मपि अस्यामिवपूर्णिमास्याविशेषः स्मर्यते आदित्यपुराणे ज्येष्ठेमासितिलान्दद्यात् पौर्णमास्यांविशेष
तः अश्वमेधस्ययत्पुण्यंतत्प्राप्नोतिनसंशयः गत्यविष्णुः ज्यैष्ठीज्येष्ठायुताचेत्स्यात्कुंभोपानत्प्रदानेननरो १ग४
नराधिपसमाप्नोति इयंमन्वादिरपि सापौर्वाह्णिकीग्राह्येत्युक्तं तथाऽपरार्केवामनपुराणे उदकुंभोंबुदानं
नतालवृंतंसुचंदनं त्रिविक्रमस्यप्रीत्यर्थंदातव्यंज्येष्ठमासितु इतिज्येष्ठः आषाढशुक्लेमासीचम
न्वादिः पूर्वाह्णव्यापिनीत्युक्तं आषाढशुक्लद्वादश्यामनुराधायोगवाह्निनायांपारणंकुर्य्यात् तथाऽवहेमाद्रौ
भविष्ये आभाकासितपक्षेषुमैत्रश्रवणरेवति संगमेनद्विभोक्तव्यंद्वादश्यांहौंशीहरेर्दिनि आषाढभाद्रका द४
र्त्तिकशुक्लद्वादशीषु अनुराधाश्रवणरेवतीयोगपारणंनकुर्य्यादित्यर्थः अत्रविशेषोविष्णुधर्मे मै
त्रायपादेस्वपितिहरिविष्णुःपौष्णांत्यपादेप्रतिबोधमेति श्रुतेश्चमध्येपरिवर्त्तमेतिमघ्रिप्रबोधपरिवर्त्त
नमेवमेववर्ज्ये आषाढशुक्लएवएकादश्यांद्वादश्यांवाविष्णुशयनोत्सवः कर्त्तव्यः उक्तंहेमाद्रौब्राह्मे॥
एकादश्यांतुशुक्लायामाषाढेभगवान्हरिः भुजंगशयनेशेतेक्षीरार्णवजलेसदेति हेमाद्रौभविष्ये
द्वादश्यांशुक्लपक्षेचमस्यापावर्तनोत्सवः तत्रैववाराहे द्वादश्यांसंधिसमयेनक्षत्राणामसंभवे आभाका
सितपक्षेषु शयनावर्तनादिकमिति अत्रद्वादश्यांइतिपारणाहमात्रंविवक्षितं पारणाहेपूर्वरात्रेघंटादौ

ॐ

ति॰ नि॰ ७ न्वादयन्मुकुंदमुत्कृइति वर्षचर्यचंद्रिकोक्तेः निशि स्वापो दिवोत्थानं संध्यायां परिवर्तनं पादयोगोपदानस्य
द्वेषेणापि नदा भवेत् द्वादश्यामृक्षसंयोगे पादयोगेन कारणमिति वाराहात् इदं च मलमासेन कार्यां
ईशानस्य बलिर्विष्णोः शयनं परिवर्तनम् इति कालादर्शे निषेधात् अत्र चातुर्मास्यव्रतारंभो कोभारते
आषाढे तु सिते पक्षे एकादश्यामुपोषितः चातुर्मास्यव्रतं कुर्याद्यत्किंचिन्नियतो नरः इति अस्य नित्यत्वं
तन्नैव [illegible] वार्षिकांश्चतुरो मासान्वाहयेत्केनचिन्नरः व्रतेन नो चेदाप्नोति किल्बिषं वत्सरोद्भवम्
असंभवे तुलार्के तु कर्तव्यं तत्प्रयत्नतः इति अस्यारंभस्य शुक्रास्तादावपि कार्यः नरोशक्तं नैमोपे
पे च शुक्रगुर्वोर्नष्टत्वे खंडत्वे चिंतयेदादे चातुर्मास्यविधौ नरः इति वृद्धगार्ग्योक्तेः इदं च द्वि
तीयाद्यारंभविषयं तथा अशौचमध्ये द्वितीयाद्यारंभो भवत्येव अशुचिर्वाशुचिर्वापि यदि स्त्री
यदि वा पुमान् व्रतमेतन्नरः कृत्वा मुच्यते सर्वपातकैरिति भार्गवार्चनदीपिकायां स्कांदोक्तेः प्रा
रंभस्तु तत्कालस्याद्यंतारंभे तु सूतकमिति विष्णुवचनाच्च एतत् असंक्रांतेन यामासं दैवपित्र्यकर्मणि च
मलमासमध्ये च वर्तयेन्मतिमान्नरः इति हेमाद्रौ चातुर्मास्यव्रतप्रकरणे भविष्यवचनं तत्प्रथमा
वर्ष रंभविषयं न च प्रति चातुर्मास्यव्रतप्रयोगाणां भिन्नतया अशौचादिज्ञाने द्वितीयप्रयोगोपि कर्तव्यः स्या[illegible]
त्ति वाच्यम् प्रतिवर्षं च यः कुर्याद्देवं वै शंस्मरन्हरिं देहांते तु प्रदीप्तेन विमानेनार्कवर्चसा मोदते
विष्णुलोके सौ यावदाभूतसंप्लवमिति हेमाद्रौ भविष्यवचनेन प्रयोगैक्यावगतेः व्रतग्रहणप्रकारस्तु गा॰

हे[illegible]द्दे भविष्ये एवं तां प्रतिमां विप्रो घृतपिन्याकमयं नरः प्रभासेनाग्रतो विप्रो कृतांजलिपुटस्तथा चतु
रो वार्षिकान्मासान्देवस्योत्थापनावधि इमं करिष्ये नियमं निर्विघ्नं कुरु मेऽच्युतः इदं व्रतं मया देव गृही
तं पुरतस्तव निर्विघ्नां सिद्धिमायातु प्रसादात्तव केशव गृहीतेस्मिन्व्रते देव पंचत्वं यदि मे भवेत् तदु
भवतु संपूर्णं त्वत्प्रसादाज्जनार्दन भविष्ये श्रावणे वर्जयेच्छाकं दधि भाद्रपदे तथा दुग्धमाश्वयु
जे मासि कार्तिके द्विदलं त्यजेत् स्कांदे माषमुद्गमसूराश्च चणकाश्च कुलत्थकः निष्पावा राजमा
षाश्चाढका द्विदलं स्मृतमिति स्कांदे चातुर्मास्ये च वर्जयेत् नित्यान्येतानि विप्रेंद्र वृन्ताकं बृहतीमुनी
[illegible]कारः तथा विष्णुरहस्ये धात्रीफलं इति त्रिरात्रं त्यजेत् जीर्णं धात्रीफलं त्याज्यं कथं विकाय
शोधनमिति स्कांदे वार्षिकांश्चतुरो मासान् प्रसुप्ते च जनार्दने मंचखट्वादिशयनं वर्जयेन्मतिमान्नरः
मन्तो वर्जयेद्भार्यां मांसं मधु परौदनं पटोलं मूलकं चैव वृन्ताकं च न भक्षयेत् इत्यादि शाकशब्द
[illegible] त्वक्पुष्पकवचे चेति शाकं दशविधं स्मृतमितु
दश मुद्गः मूलपत्रकारीरायवलकाद्यधिरूढकाः वर्जयेदिति शाकं दशविधं स्मृतमिति
ते अपि वृन्ताकं आचाररुचिशेषे वृन्ताकं च कलिंगं च बिल्वोदुंबरभिस्सटः उदरे यस्य जीर्यंति तस्य
दूरतरो हरिः भिःसटेति हूयपाठे हस्वान्ते भिःसटेति दीर्घपाठे तु भीःसटः स्फोरश्मांतकमिति धन्वंत
रिनिघंटः तथा निष्पावान्राजमाषांश्च समरसं धिन्तानि च वृन्ताकं च कलिंगं च सुप्ते देवे विवर्ज
येत् संधितानि लवणशाकादीनि गृहे वत्समुद्राधारणामृते रामार्चनचन्द्रिकायां पृथ्वीचंद्रो

ॐ
नि॰
सि॰
८

दयादौ तु मुहूर्त्तादिविषयेनेति दिक् । निर्णीते आषाढपौर्णिमास्यां कोकिलाव्रतमुक्तं हेमाद्रौ भविष्ये
आषाढपौर्णमास्यां तु संध्याकाल उपस्थिते संकल्पयेन्मासमेकं श्रावणे प्रत्यहं त्वहं स्नानं करि
ष्ये नियता ब्रह्मचर्ये स्थिता सती भोक्ष्यामि नक्तं भूशय्यां करिष्ये प्राणिनां दयामिति अस्यान्नक्तव्र
तत्वात्सायाह्नव्यापिनी ग्राह्या । अत्रैव व्यासपूजोक्ता । तत्र मध्याह्नव्यापिनी ग्राह्या । दिनद्वये तथात्व
परैवेति आमणभट्टौ । अथ श्रावणः । श्रावणशुक्लतृतीया मधुश्रवाख्या गूर्जरेषु प्रसिद्धा सापि
रयुता ग्राह्येति दिवोदासीये । श्रावणशुक्लचतुर्थी पूर्वविद्धा मातृविद्धा गणाधिपे इति वचनात् । श्राव
णशुक्लपञ्चमी नागपञ्चमी । चमत्कारचिन्तामणौ पञ्चमी नागपूजायां कार्या षष्ठीसमन्विता त
स्यां तु विषतो नागा इतरा सा चतुर्थिकेति मदनरत्नादयोप्येवम् । अत्र विशेषो हेमाद्रौ भविष्ये श्राव
णे मासि पञ्चम्यां शुक्लपक्षे नराधिप द्वारस्योभयतो लेख्या गोमयेन विषोल्बणाः पूजयेद्विधिवद्वी
र दधिदूर्वाङ्कुरैः कुशैः गन्धपुष्पोपहारैश्च ब्राह्मणानां च तर्पणैः ये तस्यां पूजयन्तीह नागान्भक्तिपुरः
सराः न तेषां सर्पतो वीर भयं भवति कुत्रचिदिति । श्रावणशुक्ले हस्तयुक्ते दधिव्रतं प्रागुक्तं तत्का
लीनात्वनिषेधः । तत्र दधिव्यवहाराभावात् । अत्रैव द्वादश्यां पवित्रारोपणमुक्तं हेमा
द्रौ विष्णुरहस्ये श्रावणे च सिते पक्षे कर्कटस्थे दिवाकरे द्वादश्यां वासुदेवाय पवित्रारोपणं स्मृतं
द्वादश्यां श्रावणो वा यदि पञ्चम्यामथवा हित अन्य कुलेषु कर्तव्यं पञ्चदश्यामथापि वेति तथा

राम

शिवेनतत्रैवकालोत्तरेतंत्रे आषाढ्यांचतुर्दश्यांनभस्यनभसोस्तथा अष्टम्यांवचतुर्दश्यांपक्षयोरुभयो
रपिइति अधिवासनंतुदीपिकायां गोहेहोतरिमेकालेपूर्वेद्युर्वाधिवासनमिति गौणकालस्तत्रा
र्थंतदीपिकायां पवित्रारोपणंविस्मृत्याग्रतोनभवेद्यदि कार्त्तिकेचविशुक्लेकर्तव्यमितिनारदः
हेमरूप्यताम्रलोहैःसूत्रैःकौशेयपट्टजैःकुशैःकाशैःस्वकार्पासैर्ग्रथिताःकीर्तितैःशुभैः कृत्वानि
गणितंसूत्रंत्रिगुणीकृत्यशोधयेत् तथोत्तमंपवित्रंतुषष्ट्यासहस्रात्रिभिःसप्तत्यासहितैर्द्वाभ्यांश
ताभ्यांमध्यमंस्मृ.तेसाशीतिनाशतेनैवकनिष्ठंतत्समाचरेत् साधारणपवित्राणि त्रिभिःसूत्रैःस
माचरेत् उत्तमंतुशतंग्रंथिपंचाशद्भिस्तुमध्यमंकनिष्ठंनुपविंशत्यानवत्रिंशद्भिर्मध्यमंषट्त्रिंश
च्चतुर्विंशद्वादशोत्तमकेवन चतुर्विंशद्वादशाष्टाविंतोकेमनवोविदुः शिवपवित्रंतत्रैवशिवा
गमे एकादशमितैःसूत्रैस्त्रिंशत्तावाभूयुक्तया पंचशतवाकर्तव्यंतुलाग्रंपंचमेवतालंपं द्वादशांगु
लमानैर्निष्पाद्यादशांगुलानिच लिंगविस्तारमानानिचतुरंगुलकानिचेति एतत्रवनियं न
करोतिविधानेनपवित्रारोपणंनृपः तस्यसांवत्सरीपूजानिष्फलामुनिसत्तम तस्माद्भक्तिस
मायुक्तैर्नरैर्विष्णुपरायणैः वर्षेवर्षेप्रकर्तव्यंपवित्रारोपणंहरेरिति तत्रैवाग्रे श्रावणेशुक्ल
चतुर्दश्यांपूर्णिमायांतथैवचचतुर्दश्यांवान् गणेशपाकर्मा नच्छ्वदृच्चैः श्रावणेकार्यं हि

तिथि० निर्ण: मद्ध्ये श्रावणेन तु उत्तरे त्राह्ये तु मनुष्यकात्यायनौ मद्ध्येरा[illegible]स्थ त्वा श्रवणे संक्रान्तिर्ग्रहणं तथा उपाकर्म न
कुर्वीत यदा तु सिंहे न दोषः स्मृतः दुर्दैवे कर्कटस्थे भानौ निषिद्धं स च निषेधो नर्मदोत्तरभागविषयः मा
धवीये पारिजातादौ स्थितं नर्मदोत्तरभागे तु कर्तव्यं सिंहयुक्तके कर्कटस्थितिभानौ पूर्वा कुर्या
त् दक्षिणा इति वचनात् केचित् सामगानां सिंहस्थे रवावुपाकर्मविधानात् [illegible]
९ न्नुदाक्षरणं [illegible] इति वदन्ति एतच्च मुख्यकालाभावविषयं प्रथमारंभस्तु [illegible]
सेनभवत्येव सामगानां त्वधिमासेपि भवति एतच्च सामगैरपराह्णे कार्यं इतरैः पूर्वाह्णे [illegible]
पर्वणो कुर्युः पर्वद्वैधे तु [illegible] इतरैः पूर्वं इष्टेबाणमाने [illegible]
पदे तु लौकिकाग्नौ [illegible] श्रावणपौर्णमास्यां श्रावणी [illegible]
[illegible] भानौ सिंहगते [illegible]
[illegible] षड्भिर्मासैर्न संशयः [illegible] संपद्यते [illegible]
[illegible] विप्रायदापयेत् ततो होमं प्रकुर्वीत [illegible] आहुतीनां [illegible]
व्याहृतिभिश्चाथ होमः सोपवासः प्रयत्नेन [illegible] अथर्ववेदिनां [illegible]
[illegible] श्रावणे [illegible] सिंहगावाः [illegible] इति ९
[illegible] कार्या श्रावण [illegible]

स्थापनव्रतं तत्र चंद्रोदयव्यापिनी ग्राह्या दिनद्वये सत्वे तु परे निर्णयामृते नभःकृष्णस्य तीयाकलावलीसं
ज्ञा सा परेति दिवोदासीये नभोबहुलचतुर्थी बहुलाख्या मध्यदेशे प्रसिद्धा सा पराह्णव्यापिनी ग्राह्या दि
नद्वये तथात्वे तु पूर्वा अत्र गोपूजा तद्यवान्नाशनं च कार्यं इति दिवोदासीये अथ जन्माष्टमी सा च श्राव
णकृष्णाष्टम्यां तु पक्षे भाद्रपदकृष्णा जन्माष्टमी व्रतं च नित्यं जयंतीव्रतं तु नित्यकाम्यं यस्मिन्वर्षे ज
यंत्याख्यो योगो जन्माष्टमी तदा अंतर्भूता जयंत्यामष्टमीत्युपयोगप्रशालिनि इति माधवः हेमाद्रिस्तु जयं
तीव्रतेन भिन्नं जयंती [illegible] हेयं रोहिणीरात्रिविशेषवचनं अभिजिन्नाम नक्षत्रं जयंती नाम शर्वरी मु
हूर्तो नाम विजयो यत्र जातो जनार्दनः इति ब्रह्मांडवचनात् तेन तद्युक्ता रोहिण्या योग एव कर्मकाल
व्यापिनी शौचे समयोगे तु रोहिण्यां निशीथे राजसत्तम समजायत गोविंदो बालरूपी चतुर्भुजः तस्मात्तं पू
जयेत्तत्रेति वह्निपुराणात् सर्वच रोहिणीयोगाभावे तु [illegible] व्यापिन्यष्टमी ग्राह्या परदिने तत्पिते च
योगे किंचित्करः बुधवारादिवत् यत्स्कांदे उदये चाष्टमी किंचिन्नवमी सकला यदि लभ्यते बुध
संयुक्ता प्राजापत्यर्क्षसंयुता अपि वर्षशतेनापि लभ्यते वा न लभ्यते इति तद्दानादिविषयं उपवा
सस्य श्रवणात् उदये चंद्रोदय इति वाचाचार्यमतं [illegible] यतो राज्ये [illegible] इत्येतन्नो विष्णुधर्मोक्तेः
अत्र केचित् उदयव्यापिनी ग्राह्या कुलतिथिः [illegible] योगे निर्वाके मितात्व यथा कांक्षितार्थप्रदायक
इति व्रतहेमाद्रौ निर्वासयमीव्रते भविष्यवचनात्रि वासरादिनत्वं संप्रदायिनामो [illegible] एवं स्त्रियं

आह्निकमपीत्याह: महेश्वरो नाद्यं पंतैः प्रकरणेन नियमः अमीवनेनियंत्र तस्मात्सा नायगमनायोगाद्धिति
१० दिक् श्रीकृष्णवसुदेवदेवकीयशोदानंदादिप्रतिमा निर्मायतत्पूजनादिप्रकारादिवृत्तं हेमाद्रौज्ञे
यं नद्वैवभविष्ये चंद्रार्घमंत्रो क्षीरोदार्णवसंभूत अत्रिनेत्रसमुद्भव गृहाणार्घं शशांकेमं रोहिण्या
सहितो मम ज्योत्स्नापतेनमस्तुभ्यं नमस्ते ज्योतिषांपते नमस्ते रोहिणीकांत अर्घं नः प्रतिगृह्यता
मिति श्रावणामावास्यायां कुशग्रहणमुक्तं हेमाद्रौ हारीतेन मासे नभस्यमावास्या तस्यां दर्भोच्च
यो मतः अयातयामास्ते दर्भा विनियोज्याः पुनः पुनरिति श्रावण भाः दर्शोनपक्षेतोदे मेरु नराते
नु मासे नभस्यमावास्या तस्यां दर्भोच्चयो मत इति मदनरत्ने विश्वामित्रमुदाहृतं इदं च हेमाद्रौ नाम्ना
यैरोम्नि हारीतनाम्नैकवाक्यत्वेन केचित्संग्रहवाक्येपि दर्शेति पठन्ति पद्मनाभित्यमहालयांतगति
पक्षेकुशोत्पत्तिमाहुः इति श्रावणः ॥ भाद्रशुक्लतृतीयायां हरितालिका सा तत्र परयुक्ता ग्राह्या मु
हूर्तमात्रसत्त्वेपि दिने गौरीव्रतं परे इति माधवोक्तेः हरितालिकाव्रतप्रकारो हेमाद्रि विद्वमाहा
पव्रतानाद्विवोदासीये उदाहृतं नागते भाद्रशुक्लचतुर्थी वरदचतुर्थी साद्धर्मान्वरिपोगतोऽस्या
इत्युक्तेः इदं चरविभौमयोरतिप्रशस्तं भाद्रशुक्लचतुर्थ्याभौमेनार्केणवा युता महतीसाजरवि
प्रोमर्चितेवहत्यभेन्नरः इति निर्णयामृतेवाराहोक्तेः अत्र चंद्रदर्शनं निषिद्धं तथा वाराहे १०
मार्कंडेयः सिंहादित्येशुक्लपक्षे चतुर्थ्यां चंद्रदर्शनं मिथ्याभिदूषणं कुर्यात्तस्मात्पश्येन्न तं सदा राम

दुर्वाष्टमीमुत्सृज्येह नो जायते सा विधीयते इति पुराणसमुच्चयोक्तेः यत्तु मूलर्क्षे रोहिणीसमन्वा पूर्वा वा यदि वा परा गृहि
दुर्वाष्टमी तु सा कार्या

तत्राष्टम्यां तत्र सिंहः प्रोक्ते न मितिर्वे पठेदिति स्कान्दोक्तम् विष्णुपुराणे सिंहस्थे कृष्णपक्षे सिंहो नो वर्जनीय
ते हेकुमारकि मासे पितृसूक्ष्मे तक इति भाद्रशुक्लपञ्चमी ऋषिपञ्चमी सा हेमाद्रिमते प
रा हिमाचप्रयुता चेत्स्यात्पञ्चमी तिथिरेकोक्तेः माधवमते तु पूर्वा सर्वत्र पञ्चमी पूर्वैर्युक्तेः अत्र
कर्तव्यं निर्णयामृते प्राह भाद्रशुक्लाष्टमी दूर्वाष्टमी सा पूर्वा ग्राह्या मूलर्क्षं मीतिथियुतिमापि
नु + भाद्रपदे भवेत् दूर्वाष्टमी सा कार्या ज्येष्ठामूले च वर्जयेदिति उत्तरस्याग्रहणवचनं तत्पूर्वदिने
ज्येष्ठायोगे एवं दूर्वाष्टमी ज्येष्ठामूलर्क्षयुता न या रोहिणीजनकार्याहंति
पत्यानि नान्यथा भर्तुरायुर्हरा मूले तस्मात्तां परिवर्जयेत् इति तन्निषेधात् हेमाद्रौ स्थितं इदं चागस्त्योद
ये कन्यार्के च न कार्यं मुहूर्ते भाद्रपदे मासि दूर्वास्तम्भानु चाष्टमी सिंहार्क एव कर्तव्या न कन्यार्के कदा
चित् सिंहस्थे सोत्तमा मासे नुदिते मुनिसत्तमे इति मदनरत्ने स्कान्दोक्तेः अगस्त्य उदिते तात पूज्ये
स्मिन्नोद्भवेत् वैधव्यं च यशोकं च दूर्वाशं वर्षाणि यं वर्द्धते तत्त्वेव दोषो नैव इदं च व्रतं स्त्रीणां नित्यं या
न पूजयेद्दूर्वा मोहाद्रिपर्यवाविधि त्रीणि जन्मानि वैधव्यं लभते नात्र संशय इति पुराणसमुच्चयात्

ति॰नि॰ यदा ज्येष्ठादिकं विनाष्टमीं न लभते तदा तत्रैवोक्तं कर्तव्या चैकभक्तेन ज्येष्ठा मूलं यदा भवेत् तु वीम
११ मार्गस्य ज्ञानवंधाः दिवसं नयेत् इति अथ विधिर्भविष्योत्तरे भविष्ये शुचौ वै ज्येष्ठाजातां पूर्वां यां तु
मूलेन तु स्नात्वा लिंगे तत्तद्गंधैः पुष्पैः धूपैः समर्चयेत् दध्यन्नैर्द्विजश्रेष्ठ अर्घ्यं दद्यात् त्रिलोचने तु
वीशानीभ्यो विश्ववत् पूजयेत् नियताः मंत्रस्तु त्वद्वंशतनामामि विवर्धितामि सौभाग्य
संततिं देहि सर्वकार्यकरी भव यथा शाखाप्रशाखाभिर्विस्तृतासि महीतले तथा ममापि संतानं दे
हि त्वमजरामरमिति अत्रान्नं घृतपक्वं भक्षयेत् अनग्निपक्वमश्नीयाद् दध्यन्नं पिष्टकं तथा अक्षार २४
लवणं चतुस्त्रसन्नश्नीयादिति तत्रैव भविष्योक्तेः अत्रैव ज्येष्ठापूजोक्ता माधवीये स्कान्दे मासि
भाद्रपदे शुक्ले पक्षे ज्येष्ठर्क्षसंयुते तस्मिन्कस्मिन् दिने कुर्याज्ज्येष्ठायाः परिपूजनमिति।
इयं ज्येष्ठायोगवशेन पूर्वापरा वा ग्राह्या दिनद्वये योगे परा एवेति रात्रियोगे पूर्वैव नवम्या
सह कार्या सप्तम्यष्टमी नात्र संशयः मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठर्क्षसंयुता रात्रिर्यस्मिन् दि
ने तत्र ज्येष्ठायाः परिपूजनमिति तत्रैवोक्तेः अस्यापवादः यस्मिन्दिने भवेज्ज्येष्ठा मध्या राम॰

न्याहुर्हुमप्यणुः नास्मिन् विद्धे प्रजायेत नायेन पूर्वं कामस्तर इति इदं च केवलतियौ केवलन
ह्रश्चैवान्ते मात्स्ये मत्या केवलं तिथावुक्ते तज्ज्येष्ठाख्येनं व्रतं प्रति ज्येष्ठा च तं यच्च विहिते
केवलेशुभे तिथावेवापरे याष द्वितीये केवलादिके इति द्वादिशामात्या मलं दीन वकुर्वीत ।
तया मैत्रेणाभ्याहृयोरेकादशी ज्येष्ठायां तु प्रयुज्य येन मूलविक्र जयेहेवी तिथिविनेव तस्तुतमभिति
मैत्राणु ज्येष्ठायेतेनमन्तु भं ज्येष्ठायेतेनमोनमः सर्वायेतेनमन्तु भं श्राकायै तेनमो
नमः भाद्रपदस्य शुक्ल द्वादश्यां पारहितायी वा श्रवणं कुर्यात् ग्राभाकामस्तिनपुत्रोक्षिति विवोदाह
तवचनात् उपोष्यैकादशी माहात्म्यारणं श्रवणं यदि करोति हि निर्मेष्यां द्वादश्यामहाद्वादशी
भवमिति अत्रैव स्कान्दाद्व अत्रैव प्रस्तवः मार्कण्डेयः विशेषेण महीपाल श्रवणं वद्धतेयदि
तिथिक्षयेन भोक्तव्यं द्वादश्यां लेवयेन्नहीति इह च श्रवणर्द्धे विधाविभज्य मध्यमाविंशति
घटिका योगे त्वकार्या पारणां कार्यं तदुक्तं विष्णुधर्मे श्रुतेस्तु मध्यमपादविंशतिमेतिक मध्ये पारि
वर्तनमेव वर्ज्यमिति केचित्तु चतुर्द्धा विभज्य मध्यमपादद्वयं वर्ज्यमित्याहुः अत्रैव विष्णु
परिवर्तनोत्सवं कुर्यात् अत्रैव पात्रकथ जोत्थान मत्र पार्श्वे गर्गात् द्वादश्यां तु दिने पक्षे
मासि प्रोष्ठपदे तथा शक्रस्योत्थापये राजा विष्णुश्रवणवात वै इयमेव श्रवणद्वादशी ॥

तथा एकादश्यामेव व्रतं भवति यदा द्वादश्येव कृत्स्ना
तदा तत्र उभयत्रोपवासेन अशक्तस्तु एकादश्यां
ल ४ गौणोपवासे कृत्वा द्वादशी ...

ति॰नि॰ १२

तत्रैकादश्यां द्वादशी श्रवणयोगे सैवोपोष्या विष्णुशृंखलाख्ययोगविशेषात् एकादश्याः श्रवणयोगा
भावे पितरि नाचक्रेरन्श्रवणयुक्तद्वादशी सोपोष्या विष्णुशृंखलमिति हेमाद्रिमतम् निर्णयामृ
तेन श्रवणस्यैकादशीद्वादशीस्पर्शे एव विष्णुशृंखलं नान्यथेति यत्तु निशीथानन्तरं सूर्योद
यं विकलामात्रमपि श्रवणर्क्षं तदपि मुख्यं द्वितीयस्तीर्येत् राज्ञः श्रवणयोगस्तस्य योगः स्यात्
अन्ययोक्तेरित्युक्तं इयं तु पवारेति प्रसक्ता यदा त्वेकादश्येव श्रवणयुतानद्वादशी मुपवसेत्
इदं च व्रतं काम्यमिति गौडाः नित्यमिति दाक्षिणात्याः पारणं तु उभयान्ते अन्यतरान्ते वा कु
र्यात् भाद्रपदे श्रवणस्यैकादश्यां मध्याह्ने वामनावतारः तत्र वामनपूजा व्रतिमानादिकं
व्रतं हेमाद्रौ स्थितं श्रवणयुताद्वैकादश्यां मला भेतु दशमी विद्धापि श्रवणयुता ...
ग्राह्या तथा च मदनरत्ने वह्निपुराणे दशम्येकादशीयत्र सा नोपोष्या भवति त्रिधिः श्रवणे
न तु संयुक्ता पोष्या सर्वकामदेति अस्यां द्वादश्यां दध्यव्रतं सैकल्यं दुग्धं त्रते तु पायसादि
कं वर्ज्यं दधि चूतादयस्तत्र द्विकाएल्लुग्रह्याएव न तैवं संधिन्यादि क्षीरनिषेधेपि दध्यादि ग्रा
संस्यादिति चेत् न तत्र वाचनिकनिषेधाहत्वात् तथा हापरार्के शौवेः क्षीराणि यानि वा। सामग्री

र्व्यानिंतद्विकालव्यापिनेष्वयः समस्तांव्रतंकुर्यात् अप्यत्नेनसमाहितः इतिव्रतं गोमूत्रयावकं भा
द्रशुक्लचतुर्दश्यां अनंतव्रतम् तत्रद्विमुहूर्ता पौर्णपिकीग्राह्येतिमाधवः दिवोदासीयेतु म
ध्याह्नेभोज्यवेलायामिति कथायांश्रवणान्मध्याह्नव्यापिनीग्राह्येत्युक्तं सिंहगेसूर्येएकवि
शतिदिनोपरि अगस्त्योदयः उदेतिभगवान्हरिस्तत्क्रमाद्रवेरेकाधिकेविंशतिनेअगस्त्यः
दिवोदासोदाहृतवचनात् तत्रकाशपुष्पमयीमगस्त्यप्रतिमांकृत्वातत्रजानादिकंअगस्त्यः
खनेनमानतस्त्यद्वैर्घ्यादिति व्रतहेमाद्रौस्पष्टम् भाद्रपदपौर्णमास्यांप्रपितामहात्परात्स्त्री
नुहिप्यामाश्राद्धंकार्यं तदुक्तंहेमाद्रौब्राह्मेमार्कंडेययोः नांदीमुखानांप्रत्यब्दंकन्याराशिगते
रवौ पौर्णमास्यांतुकर्तव्यंवाराहवचनंयथेति नांदीमुखत्वंचोक्तंतत्रैव पितापितामहश्चै
वतथैवप्रपितामह त्रयोह्यश्रुमुखाह्येते पितरःपरिकीर्तिताः तेभ्यःपूर्वतरायेचप्रजावंतः
सुखैधिताः तेतुनांदीमुखानांदीसमृद्धिरितिकथ्यते एतच्चानित्यं प्रत्यब्दमितियुक्तेः प्र
जनानामहाश्रपिकार्यः पितरोयत्रपूज्यंतेतत्रमातामहाअपीति धौम्योक्तेः पितृश्राद्ध
स्यपितृभावापन्नमात्रपरत्वात् जनकपरत्वेबहुवचनात्तामनजःस्यात् आश्विकेतुवचनान्नि
वृत्तिः अथमहालयः दर्शाचेद्रोदयेदृश्मनुः आषाढीमवधिंकृत्वापंचमंपक्षमाश्रिताः।

नि.सि. काङ्क्षन्तीति पितरः क्लिष्टा अन्नमप्यकृतं जलं ब्रह्माण्डमार्कण्डेययोः कन्यागते सवितरि दिनानि दश पंचे

१३ च पूर्वेणैव विधिना श्राद्धं तत्र विधीयते हेमाद्रौ कन्यागते सवितरि यान्यहानि तु षोडश

क्रतुभिस्तानि तुल्यानि देवेनोक्तानि षोडश तत्रैवाश्वयुजाते निषिद्धेष्वपि तेषु षोडश

दिनत्वे श्राद्धावश्यकत्वपर्यमित्येकः पक्षः भाद्रपूर्णिमया सहेति द्वितीयः आश्विनशुक्लप्र

तिपदा सहेति तृतीयः इह पक्षाः पञ्चम्यादि २ अष्टम्यादि ३ दशम्यादि ४ एक

स्मिन्दिने ५ वा श्राद्धमिति तथा च गौतमः अथापरपक्षे श्राद्धं पितृभ्यो दद्यात् पञ्चम्या

दिर्वामि अष्टम्यादिर्दशम्यादिः सर्वस्मिन्वेति हेमाद्रौ नागरखण्डे आषाढ्याः पञ्चमे प

क्षे कन्यासंस्थे दिवाकरे यो वै श्राद्धं नरः कुर्यादेकस्मिन्नपि वासरे तस्य संवत्सरं यावत्त

ृप्ताः पितरो ध्रुवमिति तत्र संन्यस्तमहालये वर्ज्यानि पृथ्वीचन्द्रोदये प्रयोगपारिजाते

ऽप्युक्तं वसिष्ठः नंदायां भार्गवदिने चतुर्दश्यां त्रिजन्मसु एषु श्राद्धं न कुर्वीत गृही पुत्रधनक्षयात्

जन्मभं तत्पूर्वोत्तरे च त्रिजन्मानि अस्यापवादो हेमाद्रौ अमायां ते भरण्यां च द्वादश्यां पक्षमध्यके

तथा तिथिं च नक्षत्रं वारं च न विचारयेत् इति पराशरमाधवीयमदनरत्नपारिजातादिष्वप्येवं निर्णय

दीपिकायां तु पितृमृताहेऽपि सर्वाणि नैव धमवादर्शनः आषाढ्याः पञ्चमे पक्षे कन्यासंस्थे दिवाकरे रामः

स्तान्हनि पितुर्यो वै श्राद्धं दास्यति मानवः तस्य संवत्सरं यावत्संतुष्टाः पितरो ध्रुवमिति नागरखंडोक्तेः
यतिथिर्वस्ता तस्मात्ताहेतु प्रवर्तते स्मातिथिः पितृपक्षे तु पूजनीया प्रयत्नतः इति कात्यायनोक्तेश्च
स्मृतिः महालये तथा हेवत्सरे प्रेतपक्षे जन्मनि तीर्थे च निर्वपेत्पिंडान् रविवारादिकेऽपि कन्याग
तः स्मार्त्तः पक्षमध्ये तु करोत्येकदिने यदि निषिद्धेऽपि दिने कुर्यात्पिंडदानं यथाविधीति यत्तु
स्मृत्यर्थसारे विवाहे व्रतचूडासु वर्षमर्द्धं तदर्द्धकं पिंडदानं मृदुस्नानं न कुर्यात्तिलतर्पणं इत्या
पवादमाह दिवोदासीये तु बृहस्पतिः तीर्थे संवत्सरे प्रेते पितृयागे महालये पिंडदानं न कुर्वी
त युगादिभरणीमघे महालये गयाश्राद्धे मातापित्रोर्मृतेऽहनि कृतोद्वाहोऽपि कुर्वीत पिंडनि
र्वापणं सदेति संन्यासिनां तु द्वादश्यां श्राद्धं कार्यं यतीनां वनस्थानां वैष्णवानां विशेष
तः द्वादश्यां विहितं श्राद्धं कृष्णपक्षे विशेषतः इति पृथ्वीचंद्रोदये संग्रहोक्तेः इदं च श्राद्ध
मन्नेनैव कर्तव्यं मृताहं च सपिंडं च गयाश्राद्धं महालयं आपन्नोऽपि न कुर्वीत श्राद्धमामेन
कर्हिचिदिति स्मृतिदर्पणे गालवोक्तेः अत्र याश्च देवताः संग्रहे तातांबात्रितयं सपत्नजन
ननी मातामहादित्रयं सस्त्रीसुतं तनयादि तातजननी स्वभ्रातरः सस्त्रियः तातांबात्म
भगिन्यपत्यधवयुक् जायापिता सद्गुरुः शिष्याप्ताः पितरो महालयविधौ तीर्थे तथा तर्प

नि०सि० ले इतिमस्पार्थः तातत्रयीमातत्रयं च अत्र विशेषः स्मृतिदर्पणे गालवोक्तेः अनेकाम्ना
१४ नेरोयत्र श्राद्धं चापरपक्षके अन्नदानं पृथक् कुर्यात् पिंडमेकं तु निर्वपेत् जीवन्मातृकस्तु मा
तृमातृ एकोद्दिष्टं कुर्यात् नपार्वणं इत्युक्तीति निर्णीतामहादित्रयं सपत्नीकमित्यर्थः तथा
चनवदैवत्यं उक्तं चहेमाद्रौ महालये गयाश्राद्धे वृद्धौ चान्वष्टकासु च नवदैवतमेवेष्टं शेष
ताट्पौरुषं विदुः विभवे सति तु मातामहीनामपि पृथक् कार्यं महालये गयाश्राद्धे वृद्धौ चान्वष्ट
कासु च ज्ञेयं द्वादशदैवत्यं तीर्थे प्रोष्ठपद्यां मघासु चेति निगमोक्तेः तातभ्राता पितृव्याः जननी
भ्राता च मातुलाः तात्स्त्रियः पितृव्यास्त्रीमातुलानीभ्रातृजाया पितृष्वसृमातृष्वसृभगिन्यौ
अपत्यभर्तृयुक्ताः तेन सापत्न्यायै सपत्न्यै इति प्रयोगो ज्ञेयः एताः सुतसहिताः पुत्रत्वं दत्ता
